# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा - शास्त्री(SEM-3)(New)** | **प्रश्नपत्रम् – 7** | गुणाः –70 |
| विषयः – नव्यव्याकरणम् | **कोड –C.E.2.3.3** | समयः- 8 तः 11 पर्यन्तम् |
| दिनाङ्कः –16/10/2019 | सन्दर्भग्रन्थः – वैयाकरणसिद्धान्तकौमुदी | |

---

**प्र. क्र.** **प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधोलिखितेषु सूत्रेषु द्वयोः सूत्रयोः सोदाहरणं व्याख्या कार्या।** १०

१ आङो दोऽनास्यविहरणे

२ उपान्मन्त्रकरणे

३ संप्रतिभ्यामनाध्याने

**प्रश्न २ अधोलिखितेषु पञ्चानां ससूत्रं साधनिकाः कार्या।** १०

१ व्यतिघ्नन्ति २ भोजनकाल उपतिष्टते ३ आहते ४ हरिमुपकुरुते

५ उत्सहते ६ धर्मार्थं विनियुङ्क्ते ७ अनुकरोति ८ शेते कृष्णस्तं गोपी शाययति

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ निम्नाङ्कितेषु द्वयोः उत्तरं लिखत।** १०

१ 'निगरणचामनार्थेभ्यश्च' सूत्रस्य सोदाहरणं व्याख्या कार्या।

२ 'आतो युक्चिणकृतोः' सूत्रं व्याख्यात।

३ इट दीर्घश्चिण्वदिट् लत्वदत्व द्वित्वत्रिकं तथा ।
इत्यष्टानां विकल्पेन चतुर्भिरधिकं शतम्॥ इति कारिका व्याख्येया।

**प्रश्न ४ अधोलिखितेषु पञ्चानां ससूत्रं साधनिकाः कार्या।** १०

१ अभावि २ काष्ठानि पचन्ति ३ तप्यते पतस्तापसः

४ स्मारिता-स्मर्ता

५ दायिषीष्ट ६ अगारिध्वम् ७ अकामि

८ अचिकीर्षिष्ट

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधोलिखितेषु सूत्रेषु द्वयोः सूत्रयोः व्याख्या कार्या। १०**

१ चजोः कु घिण्ण्यतोः

२ यजयाचरूपप्रवचर्चश्च

३ पुरिमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गना।
विगृह्य चक्रे नमुचिद्विषा बलीय इत्थमस्वास्थ्यमहर्दिवं दिवः॥ इति कारिका व्याख्येया।

**प्रश्न ६ अधोलिखितेषु पञ्चानां ससूत्रं साधनिकाः कार्या। १०**

१ निर्विण्णः २ देयम् ३ वहन्त्यनेनेति वह्यं शकटम्

४ अनुवाद्यम्

५ मार्ग्यः ६ कृत्यम् ७ याज्यम्

८ भाव्यम्

**प्रश्न ७ निम्नलिखितेषु प्रश्नेषु केषाञ्चित् दशानां प्रश्नानाम् उत्तराणि लिखत। १०**

१ आत्मनेपद-परस्मैपदाधिकारौ अष्टाध्यायाः कस्मिन् अध्याये वर्तेते?

२ 'भावकर्मणोः' सूत्रेण किं विधीयते?

३ 'कर्तरिकर्मव्यतिहारे' सूत्रेण किं विधीयते?

४ व्यतिलुनीते पदस्य कोऽर्थः?

५ 'विपराभ्यां जेः' इति कस्य धातोः विषये अस्ति?

६ 'संक्ष्णुते' इत्यत्र केन सूत्रेण आत्मनेपदं भवति ?

७ भावकर्मणोः सूत्रघटकस्य कर्म-पदस्य कः अर्थः?

८ वोढव्यः पदस्य कोऽर्थः?

९ कुण्डपाच्यः पदस्यार्थः कः?

१० का नाम संमतिः?

११ धाय्या पदस्य कोऽर्थः?

१२ ‘राजसूया...........’ इति सूत्रपूर्तिं कुरुत ।

१३ शतं सञ्जानीते इति वाक्ये संजानीते पदस्य कोऽर्थः?

१४ आत्मनाम गुरोर्नाम ............... इति संपूर्णा कारिका लेख्या।

१५ अजन्ताद्धातोः यत्प्रत्ययविधायकं सूत्रं किम्?